Serial Number
↓

Roll No. ..................................

SET/सेट : **A**

Total No. of Questions : 23

Total No. of Printed Pages : 8

# J-503

## हाईस्कूल मुख्य परीक्षा वर्ष - 2023

## High School Examination (Main) - 2023

## संस्कृत

## SANSKRIT

Time : 3 Hours ] [ Maximum Marks : 75

**निर्देश :**

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि ।

1 उचितं विकल्पं चित्वा लिखत - 1×6=6

(i) 'रामस्य' इत्यस्य पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(ii) 'लतायाम्' इत्यस्मिन् पदे का विभक्ति अस्ति ?

(अ) प्रथमा (ब) द्वितीया

(स) चतुर्थी (द) सप्तमी

(iii) 'नद्या' इत्यस्य पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(iv) 'रमा' इत्यस्य पदे का विभक्ति अस्ति ?

(अ) प्रथमा (ब) चतुर्थी

(स) पञ्चमी (द) सप्तमी

(v) 'अहं श्वः ग्रामं गमिष्यामि ।' इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) अहं (ब) श्वः

(स) ग्रामं (द) गमिष्यामि

(vi) 'सदाचारः एव परमो धर्मः ।' अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) सदाचारः (ब) एव

(स) परमः (द) धर्मः

2 शुद्धवाक्यानां समक्षम् आम् अशुद्धवाक्यानां समक्षम् न इति लिखत – 1×6=6

(क) 'भविष्यति' इत्यस्मिन् पदे मध्यमपुरुषः अस्ति ।

(ख) 'अगच्छत्' इत्यस्मिन् पदे एकवचनम् अस्ति ।

(ग) 'पठति' इत्यस्मिन् पदे लट्लकारः अस्ति ।

(घ) 'गच्छन्तु' इत्यस्मिन् पदे लृट्लकारः अस्ति ।

(ङ) 'प्राचार्यः' इत्यस्मिन् पदे प्र उपसर्गः अस्ति ।

(च) 'निर्धनः' इत्यस्मिन् पदे निस् उपसर्गः अस्ति ।

3 युग्ममेलनं कुरूत – 1×6=6

| | | | |
|---|---|---|---|
| (क) | विद्यालयः | (i) | द्वन्द्वसमासः |
| (ख) | चौरात् भयम् | (ii) | विसर्गसन्धिः |
| (ग) | मनोरथः | (iii) | दीर्घस्वरसन्धिः |
| (घ) | रामकृष्णौ | (iv) | पञ्चमी तत्पुरुषः |
| (ङ) | जगदीशः | (v) | बहुव्रीहिः समासः |
| (च) | पीताम्बरः | (vi) | व्यञ्जनसन्धिः |

4 एकपदेन उत्तरं लिखत – 1×6=6

(क) 'पठितवान्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

(ख) 'गन्तुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

(ग) 'वर्तमानः' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

(घ) 'सर्वदा' सर्वकार्येषु का बलवती ?

(ङ) 'अत्र' जीवितं कीदृशं जातम् ?

(च) केन सम्बन्धेन वाल्मीकिः लवकुशयोः गुरु ?

5 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – 1×6=6

(बालकः, सुन्दरः, निर्थकम्, तनुः, रसालम्, गीतानि, दुर्लभः)

(क) मधुराभिः गीतानि इत्यस्मिन् पदयोः ________ विशेष्यम् अस्ति ।

(ख) सुन्दरः बालकः इत्यस्मिन् पदयोः ________ विशेषणम् अस्ति ।

(ग) 'आम्रम्' इत्यस्य पदस्य ________ पर्यायः भवति ।

(घ) 'शरीरम्' इत्यस्य पदस्य ________ पर्यायः भवति ।

(ङ) 'सुलभः' इत्यस्य पदस्य ________ विलोमपदं भवति ।

(च) 'सार्थकम्' इत्यस्य पदस्य ________ विलोमपदं भवति ।

**(प्रश्न क्रमांकः 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत–)**

6 अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ? 2

**अथवा**

व्याघ्रः किं विचार्य पलायितः ?

7 रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत् ? 2

**अथवा**

मातुः अधिका कृपा कस्मिन् भवति ?

8 केन समः बन्धुः नास्ति ? 2

अथवा

मयूरः कथं नृत्यमुद्रायां स्थितः भवति ?

9 वस्तुतः चौरः कः आसीत् ? 2

अथवा

सरसः शोभा केन भवति ?

10 सरसः तीरे के वसन्ति ? 2

अथवा

जनः किमर्थं पदातिः गच्छति ?

11 स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वे) $1\times2=2$

(i) जनकेन **सुताय** शैशवे विद्याधनं दीयते ।

(ii) न्यायधीशः **बंकिमचन्द्रः** आसीत् ।

(iii) **व्याघ्रं** दृष्ट्वा धूर्तः शृगालः अवदत् ।

12 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) $1\times2=2$

(i) सव्यवधानं न चारित्र्यलोपाय ____कः____ ____कम्____

(ii) जानाम्यहं तस्य नामधेयम् ____कः____ ____कम्____

(iii) व्यस्य ! अपूर्वं खलु नामधेयम् ____कः____ ____कम्____

13 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः – (कोऽपि द्वे) 1×2=2

(i) श्री गणेशः नमः ।

(ii) वृक्षस्य पत्रं पतति ।

(iii) सीता रामस्य सह वनं गच्छति ।

14 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – (कोऽपि चत्वारि) $\frac{1}{2} \times 4 = 2$

(स्थितप्रज्ञः, यथासमयम्, अहिभुकः, सदा, अत्र, भृशम्)

(i) ________ समयस्य सदुपयोगः करणीयः ।

(ii) ________ जीवनं दुर्वहम् अस्ति ।

(iii) इदानीं वायुमण्डलं ________ प्रदूषितमस्ति ।

(iv) सर्वेषामेव महत्त्वं विद्यते ________ ।

(v) मयूरः ________ इति नाम्नाऽपि ज्ञायते ।

(vi) बकः अविचलः ________ इव तिष्ठति ।

15 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – $\frac{1}{2} \times 4 = 2$

(i) व्याघ्रः व्याघ्रमारीइयमिति मत्वा पलायितः ।

(ii) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रः विभज्य भुज्यताम् ।

(iii) मार्गे सा एकं व्याघ्रम् अपश्यत् ।

(iv) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।

16 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 1×2=2

(i) सः रोटिकां खादति । (कर्मवाच्ये)

(ii) गायकेन गीतं गीयते । (कर्तृवाच्ये)

(iii) छात्रः ग्रन्थं पठति । (कर्मवाच्ये)

17 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषितं लिखत । 2

0579561 0579561

18 अधोलिखितम् गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत— 3

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत । सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत् । तथापि वृषः नोत्थितः । भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्याम् श्रूणि आविरासन् ।

प्रश्नाः –

(i) कृषकः काभ्यां क्षेत्रकृर्षणं कुर्वन्नासीत् ?

(ii) तयोः बलीवर्दयोः एकः कीदृशः आसीत् ?

(iii) मातुः सुरभेः नेत्राभ्यां कानि आविरासन् ?

अथवा

विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं तदानीमेव किञ्चिद् विचित्रमघटत । चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत् । तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौररोऽयम इति प्रख्याव्य कारागृहे प्राक्षिपत् ।

प्रश्नाः –

(i) गृहाभ्यान्तरं कः प्रविष्टः ?

(ii) देवगतिः कीदृशी अस्ति ?

(iii) ग्रामवासिनः किम् अकुर्वन् ?

19 अधोलिखितम् पद्यांशं सम्यकः पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 3

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।<br>
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥

प्रश्नाः –

(i) महान् रिपुः कः अस्ति ?

(ii) केन समः बन्धुः न अस्ति ?

(iii) कं कृत्वा नरः न अवसीदति ?

अथवा

एक एव खगो मानी वने वसति चातकः ।<br>
पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥

प्रश्नाः –

(i) कः वने वसति ?

(ii) चातकः कीदृशः खगः वर्तते ?

(iii) कीदृशः चातकः म्रियते ?

20 अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत 3

सिंहः – (क्रोधेन् गर्जन्) भोः ! अहं वनराजः, किं भयं न जायते ? किमर्थं मावेवं तुदन्ति सर्वे मिलित्वा ?

एकः वानरः – मतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः । राजा तु रक्षकः भवति परं भवान् तु भक्षकः । अपि च स्वरक्षायामपि समर्थः नासि, तर्हि कथमस्मान् रक्षिष्यसि ?

अन्यः वानरः –किं न श्रुता त्वया पञ्चतन्त्रोक्तिः –

यो न रक्षति वित्रस्तान् पीड्यमाना परैः सदा ।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥

प्रश्नाः –

(i) कः कथयति अहं वनराजः अस्मि ?

(ii) सिंहः किं कुर्वम् अवदत् ?

(iii) वानरः सिंहम् किं कथयति ?

**अथवा**

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह – "भवान् कुतः भयात् पलायितः ?"

व्याघ्रः – गच्छ, गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः ।

शृगालः – व्याघ्र ! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

व्याघ्रः – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

जम्बुकः – स्वामिन् ! यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र ! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति ।

प्रश्नाः –

(i) शृगालः कीदृशः आसीत् ?

(ii) व्याघ्रः कया प्रहरन्ती दृष्टा ?

(iii) व्याघ्रेन किं कुर्वन्ती सा दृष्टाः ?

21 स्वप्राचार्यस्यकृतं अवकाशार्थम् एकं प्रार्थनापत्रम् संस्कृतभाषायां लिखत । 4

**अथवा**

स्वभगिन्याः विवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं लिखत ।

22 अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 4

कस्मिंश्चित् प्रदेशे काचित् नदी प्रवहति स्म । नदीतीरे कश्चन संन्यासी स्वशिष्यैः सह आश्रमं निर्माय वसति स्म । एकदा संन्यासी शिष्यैः सह नद्याः अपरं तीरं गन्तुम् एकां नौकाम् आरुढवान् । वेगेन प्रवहन्त्यां नद्याम् अकस्मात् एका अपरा नौका शिलायाः घट्टनेन् निमग्ना अभवत् । तेन तस्यां नौकायां स्थिताः सर्वे जनाः मरणं प्राप्तवन्तः । संन्यासी अकथयत् – तस्यां नौकायां स्थितेषु कश्चित् दुष्टः आसीत् इति मन्ये । अतः ते सर्वे मरणं प्राप्तवन्तः ।

(i) संन्यासी कुत्र वसति स्म ?

(ii) नौका कस्याः घट्टेन निमग्ना अभवत् ?

(iii) एकदा संन्यासी कैः सह नद्याः अपरं तीरं गतवान् ?

(iv) संन्यासी किम् अकथत् ?

23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 4

(i) संस्कृतभाषायाः महत्वम् ।

(ii) कविः कालिदासः ।

(iii) छात्रजीवनम् ।

(iv) दूरदर्शनम् ।

0579561 0579561 0579561 0579561